This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंनिमित्तं त्वाऽस्माकं ध्यानेमतिः शृणु। सामग्र्या स्वविषयात्मानुभवगम्याम्यास्वपा स्वा
अवेस्तु अनिर्वाच्याऽविद्यास्ति: सा तदाश्रयत्वविषयत्वबलेन सच्चिदानंदस्वस्वरूपं आ
च्छाद्य निक्षिपति। द्वितीयस्वभावं आवृणोति। यथा गगनं गागारांधकारः आगारग
र्तं तथा चिद्रूपं कूटस्थं आत्मानं स्वस्वरूपं आच्छाद्य विक्षिपति। तदा देहादौ अहंममत्वेना
भिमन्यमानोऽज्ञानी वा प्राप्तानंदः प्राप्तरागानर्थः अविद्यापरिकल्पितैरेव साधनै
रिष्टप्राप्तिमनिष्टनिवृत्तिं च हृदि आकांक्षन् लौकिकवैदिकस्वाभाविकानुष्ठितै
र्दिविषयसुखार्थं कर्माणि कुर्वन् मोक्षमलभमानः अलाबुवत् प्रकारादिभि
रिव रागद्वेषादिभिः प्रेरितः सन् अपेक्ष्यमाणः सुरनरतिर्यगादिप्रभेदभिन्नासु नानायो
१० निषु परिवर्त्तमानः मोहेन मुह्यमानः संसरति। अस्य संसारनिवृत्तिं शृणु। सुकृतैश्चिरपुण्य
वशादीश्वरदत्तेन निष्कामकर्मानुष्ठानेन अपगतरागादिमलः अनित्यादिदर्शनः इहामुत्रा
र्थफलभोगविरागः आत्मानं ज्ञातुमिच्छति। तदा त्वंपदशोधनेन जीवत्वं निरस्य [illegible]। शु
द्धो भविष्यति। सा शोधनयुक्तिः शृणु। अरे वत्स। इदं शरीरं दृश्यं जडं अनित्यं अमंगलं

Acc. No:- ~~237~~ M1071
Title:- अध्यात्मविद्योपदेश प्रक्रिया
Author:- Sankaracharya
Subject:- vedanta
पत्रे:- 20

Checked 2012

KKSU LIBRARY RAMTEK 441 106 M1071 Dist. Nagpur

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं न भवसि। भो भगवन् इदं कथं। स्थूलं एतच्छरीरोयस्ते:भोगे तच्छरीरं तव नास्ति एतच्छरीरनाशा

दूर्ध्वमपि स्थे अतः त्वं इदं न भवसि। किं च मम देहमिति प्रतीयते। अतोपि त्वस्य काशाश्चि। नं

त्वं द्रष्टा। अपि च जडत्वं प्रदर्शयति। तत्तानि पंचभूतानि तानि पंचीकृतानि लिंगदेशोऽवमि

दं शरीरं जडं त्वं चेतनोसि। स्वामिन्। तद्देशो स्थवमिदं शरीरं। कथं। शूयं। यत्काठिन्यं सा

पृथिवी। यद्द्रवत्वं तदापः। यदुष्णत्वं तत्तेजः। यत्संचरति। स वायुः। यत्सुषिरं तदाका

शमिति। तानि पंचविंशतिगुणानि। अस्थि। मांस। स्नायु। त्वक्। रोमाणि। इति पृथिवी

पंचधा भवति। रेतः। पित्तं। स्वेदं। लाला। रक्तं। इति आपः पंचधा। क्षुधा। तृषा। निद्रा। कां

तिः आलस्यमिति तेजः पंचधा भवति। धावनप्रसारणोत्क्रमण चलन संकोचनानि ए

वं वायुः पंचधा भवति। कटिः उदरं। हृदयं। कंठः। शिरांसि। एवं आकाशं पंचधा भवति।

भो भगवन्। एकैकं भूतं पंचधा कि मिति चेत् उच्यते। परस्परानुप्रवेशात् पंचीकरणं। भो

भगवन् एकस्य भूतस्य कोवा अंशः कस्मिन् भूते प्रविष्टः का स्थितिः। उच्यते। अस्थि

मुख्या पृथिवी। काठिन्यात् पीतवर्णत्वाच्च। मांसमुदकं। आर्द्र त्वात्। स्नायुस्तेजः।

त्वरस्य परीक्षणत्वात्। त्वक् वायुः। स्पर्शधर्मत्वात्। रोमाकाशं। छेदनेदुःखाभाव

त्। रेतो मुख्य मुदकं। गंभीरस्निग्धशुभ्रवर्णत्वात्। पित्तं तेजः। उष्मांगत्वात्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।वायुः।श्रमप्रसंगत्वात्।लालाकात्रं।उर्ध्वादागमनात्।रत्नं।पृथिवी।लोहितत्वात्।
।सुधामुख्योग्निः।पचनसमर्थत्वात्।तृषा वायुः।कंठोष्ठशोषण त्वात्।निद्राकात्रं।।
।।अन्यस्वभावत्वात्।।क्रांतिरुदकं।शीतोष्मसंबंधात्।।अस्थालोहिताचभवति।आल
।।स्यंपृथिवी।।जाड्यत्वात्।धावनंमुख्योवायुः।सबलत्वात्।प्रसारेणंआकात्रं।व्यापक
।त्वात्।उत्क्रमणंतेजः।उत्कृष्टव्यापारत्वात्।चलनमुदकं।शिथिलत्वात्।।संकोचनंपृथि
।।वी।जाड्यत्वात्।शिरस्यचकौशो मुख्याकात्रं।अनाहतस्थानत्वात्।कंठेऽवकाशोवायुः।
।मुखनासिकयोःसंचरणत्वात्।हृदयावकाशोग्निः।सर्वेदाउष्णत्वात्।उदरावकाशोजलं।
।।जलाशयत्वात्।कण्ठावकाशःपृथिवी।गंधस्थानत्वात्।एवंसमहासकं जडत्वंनजवसि।।
।।भोभगवन् सुखदुःखे जानतृकथंशरीरंजडं।।शृणु।देहोनजानातिसुखदुःखे।कथं।तथि
धा:२ ।।सुसेवोरोगहंप्रविन्यशरीराभरणान्यपहृत्य [illegible] तइतिनजानाति।अतोयंतं जडोघटोयथा।
।।ननुघटोयथाजातस्तिष्ठतिदेहस्तु वर्द्धते।इ [illegible] तिचेत्।कुउयादिनिर्मीयमा मुहुर्महुर्निक्षि
।।प्यमाणामद्धर्धमानाकिंचैतन्यंभवति।एवंप्रतिदिनमन्नरूपेण समर्प्यमाणोमलसंचयः

(३)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३॥ ॥सम्यक्वर्द्धमानोप्यत्सं तजउएव॥अरत्तस्त्वंजडोनभवसि॥त्वंतुचैतन्यमेव॥अत
नं=२ ॥एवअनित्यः॥रक्तरे तःसंयोगै मलभाजनेनिष्पनोतः अयंतंमलिनः॥अतः
॥स्थूलशरीरंत्वंनभवसि॥एतत्सत्यं॥भोभगवन्॥एतत्स्थूलशरीरंअहंन
॥भवामि॥एतावताममकिंजातं॥साधुसाधुअरेसावधान॥मतिःशृणु॥य
॥दाइदंशरीरंत्वंनभवसि॥तदाजातिवर्णाश्रमाश्रयत्वंनभवसि॥षड्भावวि
॥कारोपिजायते॥अस्ति॥वर्द्धते॥परिणमते॥अपक्षीयते॥नश्यतिचाइत्यादिः॥त
॥वनास्येव॥वर्णधर्माश्रमाचारशास्त्रयं भणयोजितः॥निर्गतोसिजगज्जा
॥लासंजरादिवकेसरी॥१॥वर्णाश्रमोधर्माधर्मावपितवनास्येव॥यतःशा
॥स्त्रमाह॥यावद्देहासविद्यानं वाध्यते नप्रमाणतः॥प्रामाण्यं कर्मशास्त्राणां ना
॥वदेवोपपद्यतइति॥१॥भोभगवन्इदंस्थूलशरीरंअहंनभवामिइतिल
दानुसया॥इत्यासिषं॥स्थूलशरीरसंबंधात्॥वर्णाश्रमकुलगोत्रजातिस्त्री

॥३॥

ष्चामरूपषट्भावविकारधर्मा धर्मीममनसंस्थेन। अन्यच्च। भोभगवन् इंद्रिय
ग्रामभावशरीरेचलनाचावाकपाणोहं वधिरोहमित्या पनुभवा। स्वइंद्रियाणि अहो
।६२ इति प्रश्नो गुरुराह। तत्र तवस्ति। कथं। इत्थं। तदपि भूतकार्यमेव। भो भगवन् कस्य
भूतस्य किंकार्यं। उच्यते। नभः सकाशात् श्रोत्रं वाक् द्वि करणे समुत्पन्ने। वायुस
काशात् त्वक्पाणी। तेजः सकाशात् चक्षुः पादौ। उदकसकाशात् रसनापाय
पृथवीसकाशात् घ्राणोपस्थ। पंचांशेन मनो जातं। बुद्धिर्मनो बिरोपए
व। एतदेव विरूपोमि। श्रोत्रवाक् श्रोत्रे आकाशकार्य एव। कियारभाष्यान्येस
सलिशब्दाभिव्यंजकत्वात् प्राधान्येण शब्दोस्ति घोगस्य। त्वक्पाणी वायुवि
कारौ। स्पर्शग्रहणसाधनत्वात्॥ चक्षुः पादौ तेजोविकारौ। रूपस्य ग्रा
हकत्वात् प्रायेणो धर्मत्वं पादयोः॥ पायुजिह्वेचाप्ये। रसस्य ग्राहकत्वात्। स्ति
घ्रस्य सात्प्राधेणपायोः। घ्राणोपस्थे पार्थिवे। गंधग्राहकत्वात् प्रायेण

गंध उपस्थस्य। मनः साधारणंपंचानांकार्यं ॥ पंचवृत्तिग्राहकत्वात्। बुद्धिर्मनो
॥४॥ विशेषः॥ पाचकपाठकवत्॥ हृदि प्राणो गुदेपानः समानो नाभिमंडले॥ उदानः कं
ठदेशेस्याद्व्यानः सर्वशरीरगः॥२॥ पंचप्राणवृत्तिर्वायुर्विकार एव। एतदात्म
कत्वेनोपलभ्यमानत्वात्॥ एवंभूतानि जडानितदुत्पन्नानि इंद्रियाणितथैव॥ — ना४
भोभगवन्। स्वस्वविषयंजानंतिकथमिंद्रियाणि जडानि। तच्छृणु। अरेश्रोत्रमा
त्मानंनजानाति। परमपिनजानाति। स्वविषयंशब्दंज्ञातुंनेष्टं। अन्यविषयम
सा८ पिज्ञातुंनसमर्थे॥ उभयथाजडं॥ किंतुशब्दज्ञानंधीनमित्यर्थः॥ प्रदीपवत्।
यथादीपोरूपादिसाधनं॥ यथादीपेनरूपादिगृह्यते॥ तथाश्रोत्रेणशब्द
१४ मिति॥१॥ वामीराण्यपिकरणानि एवंसर्वेंद्रियाणि क्रियासाधनान्येव॥ यथा
दर्वीवत्। अयंतज्जडानित्वंनभवसीतिसिद्धं॥ त्वंतुज्ञानमेव॥ भोभग
वन्। प्राणसतिदेहश्चेष्टते प्राणगतेचेष्टाहीनो भवति। अतः प्राणोहं।
एवाच॥ नभेवसि। कथं। चेतन्याभावात्॥ देहवज्जडएव। स ॥५॥
त४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२

नाभ्यं॥ तत्कस्मिन्पर्यंके शयने स्वस्त्रियं स्वपुरुषोऽसिद्धे तेकस्मिं[blot]क्षिजातोऽस
गर्यास्त्रियमपहृत्य गच्छति सति यत्तान्न निवारयति। अतोऽयं ते जडस्तव॥ ननु जडश्चेत्
प्राणः कथं जडं शरीरं चेष्टते। उच्यते। जडोऽपि जडं चेष्टयेत्। लोके दृश्यते। चंडमारुतः
गृहाच्छादनपर्णशालादीन्वहत्वा॥ अन्यत्र पातयति। नैतावेतावन्मा[blot] भवति। तर्हि मनो
हं मनसि स्वस्थे पश्यति शृणोति। अहं संकल्पवान् विकल्पवान् इत्यनुसंधानं च्चो॥
मनोऽव्ययेन पश्यति न शृणोति च। गुरुराह। मनो न भव[blot]सि। कुतः इदानीं मम मनो
न्यत्र उदासीत् स्थिरस्तदुपपरसिंधावेति समनो न भवसि॥ मनः सकाशात् सद्दृष्ट
पि नष्टस्तव॥ अहं त्वं मनः न भवसीति प्रसिद्धं॥ भगवान्। तत्सत्यं। लिंगशरीरं
महं न भवामि। अनेन ज्ञानेन मे किं लाभो भविष्यति। अरे सा च ध्यानमतिः मणुाय
दाहिंग शरीरं त्वं न भवसि। तदागमनागमने स्वर्गनरकादि भोगोपि तव नास्येन। अ
पि च प्रालेख्यफलभोगोपि तव नास्येव। भो भगवन् तत्कथं उत्तं देहो भोगायतनं॥
विषयाः भोग्याः इंद्रियाणि भोग[blot]साधनानि। मनो बुद्धि भोक्ता। तावं भोक्ता भोगायतनं॥
भोग्याः भोग्यसाधनानि। एतच्चतुष्टयेन न भवसि। तस्मादारभ्य फलभोगस्तव
नास्त्येव। भगवन् जागतो स्वप्ने सुदुःखमहं नु भगवन् कथं सुदुःख ममतास्ति तच्छृणु॥
अरे शरीरगतचेष्टाः स्थूलदुःखवेदनादयः सुषुप्त्यवस्थामापन्नस्य बुद्धिलिनस्य

७

॥५॥ तवनजतीयंते। अतस्तेतच धर्माः नभवंति। यतः शास्त्रमाह। सशरीरस्याप्रि
याप्रिययोपहतिरस्तीति। अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति। कामः
संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव।
अत्र च भगवद्वचनं। इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः॥ एतत्क्षेत्रं समा
सेन सविकारमुदाहृतं। स्मृतिरपि। रागेच्छासुखदुःखादिबुद्धौ सत्यां प्रवर्तते॥
सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः॥ अंतःकरणधर्मा इत्यर्थः। इतिस्मृतिस्मृ
तिगुरुत्वानुभवात् लिंगशरीरमहं नभवामीति यदा ज्ञानं जातं तदानात्मनो भिन्न
मणनवगुणरहितो भवसि॥ स्वाभिनूनवगुणाः के। बुद्धिरागप्रयत्नद्वेषसंस्कारधर्मा
धर्मसुखदुःखानीति॥ भो भगवन्। अंतःकरणेषु बाह्यकरणेष्वपि अहमनुसंघाता
देहोहं न भवामि॥ मनोबुद्धि[illegible]पि न भवामि। एतत्सर्वं स्यानुसंधाता मामहं न जाना
मीति भ्रममस्थिरं। अतः कोहं देहीति निःसंदेहं ध्यायामि निरासं कुरु ममेति विज्ञापितः
सन् गुरुरुपदिशति। त्वं कारणशरीरमव्याकृतमज्ञानसंज्ञिकमसि॥ तत्कथं।
सोऽहमिदं सर्वं दृश्यं पृथक्पृथक्रूपं जानासि। आत्मानमेव न जानामीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेवतत्वात्साज्ञानं।इदमेवकारणंशरीरं।अस्याश्रयस्त्वमेव।।तत्कथं।।इसं।।त्वदन्यःको
पिनजानामीतिनवदतित्वमेववदसिमाहंनजानामीति।अतःअस्याज्ञानस्यत्वमेवा
श्रयः।।अज्ञानभ्रमंचत्वंसम्यक्वेत्सि।।अतस्त्वंजडोनभवसि।।वेद्यवेत्तात्।।अतस्त्वं
ज्ञानं।तस्याज्ञानस्याश्रयःप्रत्यक्साक्षी।।तद्दृश्यमानंत्वंनभवसि।।स्थूलसूक्ष्मशरी नस्वप
रवत्।।अतःकारणशरीराद्भिन्नस्त्वं।।अविच्छिन्नज्ञानैरूपोभवान्।।कोहमितिवद
सि।तन्निःसंशयंशृणु।।देहेंद्रियप्राणमनोबुद्धयः।।आत्मानंनजानंति।।~~[illegible]~~परमपि
नजानंति।।तोविनाव्यापारकारणेऽसमर्थाश्च।।त्वंतुदेहादिभिन्नःसर्वाःदेहेंद्रिय
प्राणमनोबुद्धीःजानासि।।अतस्त्वंस्वरूपंज्ञानमेव।।तथाचश्रुतिः।।येनवापश्यति
येनवाशृणोतियेनवागंधानाजिघ्रतियेनवावाचंव्याकरोतियेनस्वादुवाऽस्वादु
चविजानातितद्विज्ञानंब्रह्म।।योवेत्तिविश्वंनचतस्यवेत्तातमाहुरग्र्यंपुरुषंपुरा
णं।।स्मृतिरपि।।इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः।मनसस्तुपराबुद्धिर्यो
बुद्धेःपरतस्तुसः।।ज्ञानमात्रस्त्वमितिभावः।।अपविधिमुखेनप्रबोधयति।।य
नेहात्रिस्वरूपस्त्वंअतस्तत्वाज्ञानंनास्ति।।अतस्तस्याज्ञानस्यनिवर्तकंज्ञानमपिनास्ति।।

अध्यात्म

(9)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

ज्ञानस्वरूपत्वात्॥ यथा दीपस्य अन्यदीपेच्छा नास्त्येव प्रकाशस्वरूपत्वात्॥
६ तस्माद् ज्ञानज्ञानोद्भवौ बंधमोक्षावपि तत्त्व न स्तः॥ अतो नित्यमुक्त एव सः॥॥
विद्वांस्तु स्वेन प्रबोधयति। यतो ज्ञप्तिस्वरूपस्त्वं अतस्तवाज्ञानं नास्ति। अतस्त
स्याज्ञानस्यानिवर्त्तकं ज्ञानमपि नास्ति। ज्ञानस्वरूपत्वात्। यथा दीपस्य अ
न्यदीपेच्छा नास्त्येव प्रकाशस्वरूपत्वात्। तस्माद् ज्ञानज्ञानोद्भवौ बंधमो
क्षावपि तत्त्व न स्तः। अतो नित्यमुक्त। तत्र शास्त्रमाह। अनात्मन्यात्मधीर्बंधः
स्तन्नाशो मोक्ष उच्यते। बंधमोक्षौ न विद्येते नित्यमुक्तस्य चात्मनः। अतस्त्वं
चिद्रूपः। स्वरूपमहं प्रदर्शयति। चक्षुरादीनि करणानि आदित्याद्यनुग्रही
४ स्व तानि स्वविषयेषु प्रवर्त्तते तत्र बुद्धिः करणव्यापारमनुभवति तं च चैतन्या
ज्वलितोभयात्मकद्रष्टृदृश्याकारं विपरिणमते तज्जागरणं भवति। जा
ग्रत्संस्कारप्रत्ययवासनावासिता बुद्धिः पुष्पवटिका[illegible]वत् तं च चैतन्या
ज्वलितोभयात्मकद्रष्टृदृश्याकारं विपरिणमते तत्स्वप्नं भवति। यथा चि

त५ ६

10

त्रपटवत्। ज्ञायस्वप्नावस्थाऽविद्यासंस्कारमात्रविशिष्टा चयि विश्रम्यति निर्वि-
कल्पानुभवो भूत्वा तिष्ठति। सुषुप्त्यवस्था। न कंचन कामं कामयते न कं-
चन स्वप्नं पश्यति सुखरूपपत्ति। एवं अवस्थात्रयसाक्षी। अतः
कालत्रयस्थायी सर्वदा भावरूपः। अतस्तत्स्वरूपं सद्रूपं। आनंदरूपत्वं प्र-
पंचः। व्यापृतेषु इंद्रियेषु स्वस्वविषयादर्शितं श्रामितानि सति तत्र यि सुखस्वरू-
पे विश्रम्यत सुखमनुभूय कर्मवशात् उत्थितानि स्वव्यापारे समर्थानि भ-
वंति। यथा पटः सुगंधवत्। अतस्तत्स्वरूपं आनंद एव। अद्वितीयं प्रद-
र्शयति। आब्रह्मादिपिपीलिकांत अनुस्यूत अंतर्यामी साक्षी एक एव
अतस्स्वमद्वितीयः। तथा च श्रुतिः। एको देवः सर्वभूतेषु गूढः सर्वव्यापी स-
र्वभूतांतरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गु-
णश्चेति। साक्षी प्रपंचसद्वितीयः किं न भवति। श्रुणा मृद्विकारेषु मृदिव।
सुवर्णविकारेषु सुवर्णमिव। चिद्विवर्त्तश्चिदेव रज्जुसर्पवत्। श्रुति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारजत्ववत्। असत्त्वं अद्वितीयः। अखंडत्वं प्रदर्शयति। विजातीय सजातीय
स्वगतभेदरहितत्वात् एकरसं अखंडत्वं। जन्ममरणरहितत्वात् त्वं अचलः
आनादित्वात् कारणरहितत्वात् त्वं अजः। यथा भ्रामक सान्निधि सत्तामात्रे
ण जडं लोहं चेष्टते। तथा अहंकार ममकारेच्छा प्रयत्न रहितस्य सच्चिदान
दस्वरूपस्य तव सत्ता सान्निधि मात्रेण देहेंद्रिय प्राण मनो बुद्धि सकाशा
त् सदसत्क्रिया उत्पद्यते अतस्त्वं स्वरूपमक्रियं। अत्र भगवानाह॥ अधि
ष्ठानं तथा कर्त्ता करणं च पृथग्विधं। विविधाश्च पृथक् चेष्टा दैवं चै
वात्र पंचमं। शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः। न्याय्यं वा विपरीतं
वा पंचैते तस्य हेतवः। तत्रैवं सति कर्त्तारं आत्मानं केवलं तु यः। पश्यत्यकृत
बुद्धित्वात् न स पश्यति दुर्मतिः। अतः अक्रियस्त्वं। अविकारि कूटवत्ति
ष्ठतीति कूटस्थः। अत [illegible] स्त्वं कूटस्थः। अव्यक्तादि पृथिवीपर्यंतं सर्वत
त्वेषु पूर्वं व्यापकं चैतन्यं। यथा घटोत्पत्तेः पूर्वं व्यापकं नभः। अतस्त्वमनंतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तवद्दृश्यमानं इदं सर्वं येन सर्वं सिद्धमिति तत्वेनुभाव:॥ सच्चिदानंदस्वरूपं त्वमसि तवैव स्वसं
बैधं अतत्स्वं स्वसंज्योति। बृहत्वात् बृंहणत्वाच्च परमात्मेति चोपच्यते। तत्र ब्रह्मपररूपमीपते
ब्रह्मधा श्रुति:॥ अत ब्रह्मा उक्त स च सच्चिदानंदा हि तितामवरुमचलमजमक्रियं कूटस्थ
नैअत स्वयंज्योति: स्वरूपं प्रमाते द्योद्दृशा विशेषणैर्विविशेषितं परब्रह्मतत्वमाह॥
प्रमापिति प्रतिपद्यते॥ एवं निरस्तसमुद्भवमुदकमेव लक्षमिति तत्वेनानुभावो जात: अनुश्रुतय:
प्रमाणं। प्रज्ञानस्य नामधेयानि आत्मा वा इदमेक एवाग्र आसीत्॥ सयं ज्ञानमनं तं ब्रह्म।
स्मृतयश्च। समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं। विनश्यत्स्वविनश्यन्तं य: प
श्यति स पश्यति। अनादित्वान्निर्गुणत्वात्परमात्मायमव्यय:। शरीरस्थोपि कौ
न्तेय न करोति न लिप्यते। उत्तमपुरुषस्त्वन्य इति। नात: परं वेदितव्यं हि किंचि
त्। एक एवात्मा परं ब्रह्म संसारधर्मविमुक्तस्त्वमिति सिद्धं। एवं त्वं अभयं
प्राप्तोसि संसारदु:खान्मुक्तोसि। ज्योपाङ्गवता। यद्यपि ज्ञानोत्पत्त्यनंतरं पुनर्ज
न्माभाव उक्त:। तथापि प्राक् ज्ञानोत्पत्ते: कृतानां कर्मणां उत्तरभाविनां च
यानि चांचितानि अनेकजन्मकृतानि। तेषां च फलमदत्वा तन्नाशेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥ पुक्त इति। अन्यथा कृतनाशाकृताभ्यागमप्रसंगः सर्वत्रानाश्वासश्चानर्थ
क्यं च स्यात् अवश्यमेव भोक्तव्यं कृतकर्म शुभाशुभं इति जन्म जायते
इत्यत्र के यु॥ तन्न। ज्ञाना॰ग्न्युपस्पृष्टानि सर्वकर्माणि ज्ञानिदग्धत्वेनांकुर
यंति। तथा च श्रुतिः बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः ज्ञानदग्धै
स्तथाक्लेशैर्नात्मा संपद्यते पुनरिति। स्मृतिरपि॥ यथैधांसि समिद्धोग्निर्भ
स्मसात्कुरुतेर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा। एवं संचि
तानि क्रियमाणि ज्ञानिनो नश्यंति॥ प्रारब्धकर्मणां तु भोगादेव क्षयः।
यथा तेषां मुक्तेषुवत् प्रवृत्तफलत्वात्॥ यथा पूर्वं लक्ष्यवेधाय मुक्त इषु
र्नु बाललक्ष्यवेधानंतरकालमप्यारब्धवेगक्षयपर्यंतमेव वर्त्तते। एवं शरी
रारंभकर्म शरीरस्थिति प्रयोजने निवृत्तेपि आसंस्कारवेगक्षयात्
पूर्ववत् वर्तत एव। किं बहुनायं देहयात्रामात्रार्थं इच्छानिच्छापरेच्छा ॥८॥

क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[redacted]च्छा प्राप्तानि अरोपितसुखदुःखलक्षणानि आरब्धफलान्य
नुभवन्नतः कारणाभासादीनामवभासकः सन्तिष्ठेत्सेव । प्रारब्धकर्म
र्मक्षयात् जीवन्मुक्तानां पुनर्जन्माभावः । तथा च श्रुतौ स्वेण नश्येत परमा
र्थकृद्धिः कार्मक्षमं नस्पति चापरोक्षात् । प्रारब्धनाशात् प्रतिभासना
रावेते क्रमान्नश्यति चात्ममाया । ब्रह्मैव सन् ब्रह्माप्येति । विमुक्तश्च वि
मुच्यते इति । स्वभावतस्त्वं नि समुक्त एव । इदानीमपि यथा स्वप्ने
द्रष्टा स्वप्नागतभावे नैव प्रबुद्धः स्वप्नव्यहारे सर्वस्मिन्नभिव्याप्नुते
निरस्ते साति स यस्स्वरूपः स्वयमेवावशिष्यते । तथैव भ्रान्तिमूलसंसा
रमहास्वप्नव्यवहारे सर्वस्मिन्नभिव्याप्नुते निरस्ते साति स यस्स्वरूपः स्व
यमेवावशिष्यते । भगवन् प्रवदन् यह वेरात् देहेंद्रियादिसंबंधरहितः
सच्चिदानंदरूपोहमात्मा एवं ज्ञातेपि देहोहं बालोहं इदं मम नेदं मम इ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. ९

साधा. व्यासो न गच्छति तत्कथं। एवं सावधानमतिः श्रुणु। ज्ञानं द्विविधं प
रोक्षमपरोक्षं च। तत्र श्रवणेन परोक्षं जायते। ब्रह्मैवाहमिति॥ दशमोस्तीति वत्॥
श्रवणं नाम मया आदित आरभ्य यथा तदुक्तं तत्। ततः श्रुतार्थस्य वेदांतानु
गुणयुक्तिभिः अनवरतं अनुचिंतनं मननं। तेन केचित्कालं अपरोक्षं
जायते। यथा घटस्वरूपे विचारिते तत्काले मदेव भासते। अन्यदा घटत्वरू
पेण। तदनंतरं मननस्य परिपाकावस्था निदिध्यासनं। निदिध्यासनेन
संपूर्णं अपरोक्षं जायते। त्वं दशमोसीतिवत्। निदिध्यासनं तु विजाती
यदेहादिप्रत्ययरहिताद्वितीयवस्तु सजातीयप्रत्ययप्रवाहः। तत्र सर्वदा
समाधिं कुर्यात्। तदुक्तं। अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं। आद्यं
त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयं। उपेक्ष्य नामरूपे द्वे सच्चिदानंदवस्तुनि।

॥९॥

समाधिं सर्वदा कुर्याद्धृदये वाथवा बहिः। तत्परिपाकावस्थायां अहं मनुष्यः
इदं मम गृहं नेत्यादिप्रतीतिनाशः। तदुक्तं। देहं च नैश्वरमवस्थितमुत्थि
तं वा सिद्धो न पश्यति यतोध्यगमत्स्वरूपं। दैवादुपेतमथ दैववशादपे
तं वासो यथा परिकृतं मदिरामदांधः। देहोपि दैववशगः खलु क
र्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः। तं सप्रपंचमधिरू
ढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः। तदनंतरमपि
प्रारब्धक्षयपर्यंतं लिंगोपाध्यवास्थितिः। तदनंतरं लिंगप्रतिभा
सनाशः। कैवल्यं ब्रह्मैव भवति। तदुक्तं। शास्त्रेणानश्येत्परमा
र्थबुद्धिः कार्यक्षमं नश्यति चापरोक्षात्। प्रारब्धनाशात्प्रतिभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

•।।

सनात्राणएवंऋतूननुयतिचात्ममायया॥इदानीं अन्यविद्योपासने

देषमाह श्रुतिः यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पु

ण्यचितो लोकः क्षीयते। स्मृतिरपि क्षीणेपुण्ये मर्त्यलोकं विशं

तीति। प्रथमं आचरणे दुःखं। फले स्पर्द्धा दुःखं। भोगांते पतनं

दुःखं। एवं अन्यविद्योपासने दुःखात् दुःखमाप्नोति॥अ

त आन्या विद्यापरित्यज्य परमामध्यात्मविद्यामाश्रया। सा

कीदृशी। राजविद्याराजगुह्यं पवित्रमिदमुत्तमं॥ प्रत्यक्षा

वगमं धर्म्यं सुसुखं कर्तुमव्ययं॥ अध्यात्मविद्या विद्यानां॥

तथा॥ ब्रह्मविद्याविज्ञानादपि परमपुरुषार्थं दर्शयति श्रुतिः॥

विद्यो•।।

।।१०।।

(18)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्म विदाप्नोति परं। स्मृतिश्च। नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्। अथ शास्त्रानां धूर्तानां नास्तिकानां एतद्विद्यां न प्रकाशयेत्। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥ इति श्रुतेः॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकराचार्यकृता संक्षिप्ताध्यात्मविद्योपदेशप्रक्रिया समाप्ता॥ श्रीकाशीविश्वेश्वरचरणारविंदार्पणमस्तु॥ ध॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०

।१॥ [illegible]

॥अध्यात्मविद्योपदेशप्रक्रियासमाप्ता स्वार्थपरार्थी च॥

॥११॥

K.K.S.U. LIBRARY
RAMTEK
441 106
M1071
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.10.20 11:25
,TRANSFERRED=2020/10/06 at 11:29:15
,PAGES=21
,TYPE=STD
,NAME=S0003905
,Book Name=M-1071-ADHYATAMVIDHO PRADESH PRAKIRIYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection